श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रिपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिपञ्चाशः सर्गः ॥

## श्रीरामेण कार्यार्थिनामुपेक्षातो नृगसम्बन्धिशापकथां श्रावयित्वा लक्ष्मणस्य कार्यार्थिनां निरीक्षणाय नियोजनम्

लक्ष्मणस्य तु तद् वाक्यं निशम्य परमाद्भुतम्।
सुप्रीतश्चाभवद् रामो वाक्यमेतदुवाच ह ॥ **7.53.1** ॥

दुर्लभस्त्वीदृशो बन्धुरस्मिन् काले विशेषतः।
यादृशस्त्वं महाबुद्धिर्मम सौम्य मनोऽनुगः ॥ **7.53.2** ॥

यच्च मे हृदये किञ्चिद् वर्तते शुभलक्षण।
तन्निशामय च श्रुत्वा कुरुष्व वचनं मम ॥ **7.53.3** ॥

चत्वारो दिवसाः सौम्य कार्यं पौरजनस्य च।
अकुर्वाणस्य सौमित्रे तन्मे मर्माणि कृन्तति ॥ **7.53.4** ॥

आहूयन्तां प्रकृतयः पुरोधा मन्त्रिणस्तथा।
कार्यार्थिनश्च पुरुषाः स्त्रियो वा पुरुषर्षभ ॥ **7.53.5** ॥

पौरकार्याणि यो राजा न करोति दिने दिने।
संवृते नरके घोरे पतितो नात्र संशयः ॥ **7.53.6** ॥

श्रूयते हि पुरा राजा नृगो नाम महायशाः।
बभूव पृथिवीपालो ब्रह्मण्यः सत्यवाक् शुचिः ॥ **7.53.7** ॥

स कदाचिद् गवां कोटीः सवत्साः स्वर्णभूषिताः।
नृदेवो भूमिदेवेभ्यः पुष्करेषु ददौ नृपः॥ **7.53.8** ॥

ततः सङ्गाद् गता धेनुः सवत्सा स्पर्शितानघ।
ब्राह्मणस्याहिताग्नेस्तु दरिद्रस्योञ्छवर्तिनः॥ **7.53.9** ॥

स नष्टां गां क्षुधार्तो वै अन्विषंस्तत्र तत्र ह।
नापश्यत् सर्वराष्ट्रेषु संवत्सरगणान् बहून्॥ **7.53.10** ॥

ततः कनखलं गत्वा जीर्णवत्सां निरामयाम्।
ददृशे तां स्विकां धेनुं ब्राह्मणस्य निवेशने॥ **7.53.11** ॥

अथ तां नामधेयेन स्वकेनोवाच ब्राह्मणः।
आगच्छ शबलेत्येवं सा तु शुश्राव गौः स्वरम्॥ **7.53.12** ॥

तस्य तं स्वरमाज्ञाय क्षुधार्तस्य द्विजस्य वै।
अन्वगात् पृष्ठतः सा गौर्गच्छन्तं पावकोपमम्॥ **7.53.13** ॥

योऽपि पालयते विप्रः सोऽपि गामन्वगाद् द्रुतम्।
गत्वा च तमृषिं चष्टे मम गौरिति सत्वरम्॥ **7.53.14** ॥

स्पर्शिता राजसिंहेन मम दत्ता नृगेण ह।
तयोर्ब्राह्मणयोर्वादो महानासीद् विपश्चितोः॥ **7.53.15** ॥

विवदन्तौ ततोऽन्योन्यं दातारमभिजग्मतुः।
तौ राजभवनद्वारि न प्राप्तौ नृगशासनम्॥ **7.53.16** ॥

अहोरात्राण्यनेकानि वसन्तौ क्रोधमीयतुः।
ऊचतुश्च महात्मानौ तावुभौ द्विजसत्तमौ॥ **7.53.17** ॥

क्रुद्धौ परमसन्तप्तौ वाक्यं घोराभिसंहितम्।
अर्थिनां कार्यसिद्ध्यर्थं यस्मात्त्वं नैषि दर्शनम्॥ **7.53.18** ॥

अदृश्यः सर्वभूतानां कृकलासो भविष्यसि।
बहुवर्षसहस्राणि बहुवर्षशतानि च ॥ **7.53.19** ॥

श्वभ्रे त्वं कृकलीभूतो दीर्घकालं निवत्स्यसि।
उत्पत्स्यते हि लोकेऽस्मिन् यदूनां कीर्तिवर्धनः ॥ **7.53.20** ॥

वासुदेव इति ख्यातो विष्णुः पुरुषविग्रहः।
स ते मोक्षयिता शापाद् राजंस्तस्माद् भविष्यसि ॥ **7.53.21** ॥

कृता च तेन कालेन निष्कृतिस्ते भविष्यति।
भारावतरणार्थं हि नरनारायणावुभौ ॥ **7.53.22** ॥

उत्पत्स्येते महावीरौ कलौ युग उपस्थिते।
एवं तौ शापमुत्सृज्य ब्राह्मणौ विगतज्वरौ ॥ **7.53.23** ॥

तां गां हि दुर्बलां वृद्धां ददतुर्ब्राह्मणाय वै।
एवं स राजा तं शापमुपभुङ्क्ते सुदारुणम् ॥ **7.53.24** ॥

कार्यार्थिनां विमर्दो हि राज्ञां दोषाय कल्पते।
तच्छीघ्रं दर्शनं मह्यमभिवर्तन्तु कार्यिणः ॥ **7.53.25** ॥

सुकृतस्य हि कार्यस्य फलं नावैति पार्थिवः।
तस्माद् गच्छ प्रतीक्षस्व सौमित्रे कार्यवाञ्जनः ॥ **7.53.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिपञ्चाशः सर्गः ॥